# শ্রীশিবকামসুন্দরীসহস্রনামস্তোত্রম্

{॥ শ্রীশিবকামসুন্দরীসহস্রনামস্তোত্রম্ ॥}

॥ পূর্বপীঠিকা ॥

যস্যাস্সর্বং সমুৎপন্নং চরাচরমিদং জগত্ ।

ইদং নমো নটেশান্যৈ তস্যৈ কারুণ্যমূর্তয়ে ॥

কৈলাসাদ্রৌ সুখাসীনং শিবং বেদান্তগোচরম্ ।

সর্ববিদ্যেশ্বরং ভূতিরুদ্রাক্ষালঙ্কৃতং পরম্ ॥ ১॥

সর্বলক্ষণসম্পন্নং সনকাদিমুনীডিতম্ ।

সংসারারণ্যদাবাগ্নিং যোগিরাজং যতেন্দ্রিযম্ ॥ ২॥

মুকুটেন্দুসুধাপূরলব্ধজীবকশীর্ষকম্ ।

ব্যাঘ্রচর্মাম্বরধরং নীলকণ্ঠং কপর্দিনম্ ॥ ৩॥

সব্যহস্তে বহ্নিধরং মন্দস্মিতমুখাম্বুজম্ ।

ঢক্কাং চ দক্ষিণে হস্তে বহন্তং চ ত্রিলোচনম্ ॥ ৪॥

অভযং দক্ষহস্তেন দর্শযন্তং মনোহরম্ ।

ডোলহস্তেন বামেন দর্শযন্তং পদাম্বুজম্ ॥ ৫॥

কুচিতং দক্ষপাদেন তিষ্ঠন্তং মুসলোপরি ।

ব্রহ্মবিষ্ণ্বাদিবিনুতং বেদবেদ্যং নটেশ্বরম্ ॥ ৬॥

প্রণম্য পার্বতী গৌরী পপ্রচ্ছ মুদিতাননা ।

সর্বলক্ষণসম্পন্না সর্বদা সর্বদা নৃণাম্ ॥ ৭॥

পার্বত্যুবাচ -

শিব! শঙ্কর! বিশ্বেশ! মহাদেব! দযানিধে!

সর্বাসাং চৈব দেবীনাং নামসাহস্রমুত্তমম্ ॥ ৮॥

পুরা প্রোক্তং সদানন্দ ! মহ্যং শ্রীপতিপূজিত ! ।

শিবকামসুন্দরীনাম্নাং সহস্রং বদ সুন্দর! ॥ ৯॥

সদ্যস্সম্পৎকরং পুণ্যং সর্বপাপপ্রণাশনম্ ।

ইত্যুক্ত্বা পার্বতী দেবী তুষ্টাব নটনেশ্বরম্ ॥ ১০॥

সত্যপ্রবোধসুখসন্ততিরূপ বিশ্ব -

মাযেন্দ্রজালিকবরেণ্য সমস্তসাক্ষিন্ ।

সৃষ্টিস্থিতিপ্রলযহেতুকবিষ্ণুরুদ্র

শ্রীমন্নটেশ মম দেহি করাবলম্বম্ ॥ ১১॥

ভূবারিবহ্নিপবনাম্বরচন্দ্রসূর্য -

যজ্বাষ্টমূর্তিবিমলীকৃতবিগ্রহেদশ ।

স্বাঙ্ঘ্র্যম্বুজদ্বযনিষন্তহৃদাং প্রসন্ন !

শ্রীমন্নটেশ মম দেহি করাবলম্বম্ ॥ ১২॥

লিঙ্গাকৃতে পশুপতে গিরিজাপতে ত্বং

নারাযণেশ গিরিবাস বিধীশ শম্ভো

ফালাক্ষ শঙ্কর! মহেশ্বর মন্মথারে

শ্রীমন্নটেশ মম দেহি করাবলম্বম্ ॥ ১৩॥

শ্রীনীলকণ্ঠ শমনান্তক পঞ্চবক্ত্র

পঞ্চাক্ষরপ্রিয পরাৎপর! বিশ্ববন্দ্য ।

শ্রীচন্দ্রচূড গজবক্ত্রপিতঃ পরেশ

শ্রীমন্নটেশ মম দেহি করাবলম্বম্ ॥ ১৪॥

গঙ্গাধর প্রমথনাথ সদাশিবার্যা -

জানে! জলন্ধররিপো জগতামধীশ ।

শর্বোগ্র ভর্গ মৃড শাশ্বত! শূলপাণে

শ্রীমন্নটেশ মম দেহি করাবলম্বম্ ॥ ১৫॥

স্থাণো ত্রিণেত্র শিপিবিষ্ট! মহেশ! তাত

নারাযণপ্রিয কুমারগুরো কপর্দিন্ ।

শম্ভো! গিরীশ! শিব লোকপতে! পিনাকিন্

শ্রীমন্নটেশ মম দেহি করাবলম্বম্ ॥ ১৬॥

খঙ্গাঙ্গিন্ অন্ধকরিপো ভব ভীম রুদ্র
দেবেশ! খণ্ডপরশো! করুণাম্বুরাশে ।
ভস্মাঙ্গরাগ পরমেশ্বর! বিশ্বমূর্তে
শ্রীমন্নটেশ দেহি করাবলম্বম্ ॥ ১৭॥

বিশ্বেশ্বরাত্মক বিবেকসুখাভিরাম
শ্রীবীরভদ্র! মখহন্তরুমাসহায ।
বীরেশ্বরৈণকর শুভ্রবৃষাধিরূঢ
শ্রীমন্নটেশ মম দেহি করাবলম্বম্ ॥ ১৮॥

এবং স্তুত্বা মহাদেবী পঞ্চাঙ্গং প্রণনাম হ ।
ততস্তুষ্টো নটেশশ্চ প্রোবাচ বচনং শুভম্ ॥ ১৯॥

এবমেব পুরা দেবী মহালক্ষ্মীঃ পতিব্রতা ।
শঙ্খচক্রগদাপাণিঃ সর্বলোকহিতাবহঃ ॥ ২০॥

ধর্মসংস্থাপনার্থাযাবতারান্যুগে যুগে ।
করিষ্যতি মহা বিষ্ণুঃ মম ভর্তা দশ শৃণু ॥ ২১॥

মৎস্যঃ কূর্মো বরাহশ্চ নারসিংহোঽথ বামনঃ ।

রামো দাশরথিশ্চৈব রামঃ পরশুধারকঃ ॥ ২২॥

হলভৃত্ বলরামশ্চ কৃষ্ণঃ কল্কিঃ দশ স্মৃতাঃ ।
অবতারেষু দশসু মদ্ভর্তুর্নাশশঙ্কয়া ॥ ২৩॥

প্রাপ্তা ভবন্ত শরণং ভবানেব পরা গতিঃ ।
ইত্যুক্ত্বা চ মহালক্ষ্মীর্ভক্তানামিষ্টদায়কম্ ॥ ২৪॥

বেদপাদস্তবং চারু মধুরং মধুরাক্ষরম্ ।
উক্ত্বা তুষ্টাব মুদিতা নটেশানং মহেশ্বরম্ ॥ ২৫॥

বিঘ্নেশ্বরং বীতবিরাগসেবিতম্
বিধীন্দ্রবিষ্ণ্বাদিনতাঙ্ঘ্রিপঙ্কজম্ ।
সভাসদামাশু সুখার্থসিদ্ধিদং
গণানাং ত্বাং গণপতিং হবামহে ॥ ২৬॥

নগেন্দ্রতনযারম্যস্তন্যপানরতাননম্ ।
মাণিক্যকুণ্ডলধরং কুমারং পুষ্করস্রজম্ ॥ ২৭॥

নমঃ শিবায সাম্বায সগণায সসূনবে ।
নমো জ্ঞানসভেশায দিশাং চ পতযেনমঃ ॥ ২৮॥

নমো ব্রহ্মাদিদেবায বিষ্ণুকান্তায শম্ভবে ।

পীতাম্বরায চ নমঃ পশুনাং পতযে নমঃ ॥ ২৯॥

সন্মার্গদায শিষ্টানামাশ্রিতানাং দ্বিজন্মনাম্ ।

অভক্তানাং মোহদাত্রে পথীনাং পতযে নমঃ ॥ ৩০॥

অপস্মারমধঃ কৃত্য নৃত্যন্তং তস্য পৃষ্ঠকে ।

সর্বাভরণরম্যং তং পশ্যেম শরদশ্শতম্ ॥ ৩১ ॥

সুন্দরং স্মেরবদনং নটরাজমুমাপতিম্ ।

সম্পূজ্য নৃত্যপাদং তে জীবেম শরদশ্শতম্ ॥ ৩২ ॥

কুম্ভীন্দ্রদৈত্যং হতবানিতি শম্ভুর্জগৎপতিঃ ।

শ্রুত্বা তে কীর্তিমমলাং নন্দাম শরদশ্শতম্ ॥ ৩৩॥

মন্মথান্ধকসংহারকথাশ্রুতিমনোহরম্ ।

শ্রুত্বা তে বিক্রমযুতং মোদাম শরদশ্শতম্ ॥ ৩৪ ॥

সর্বদুঃখান্বিহাযাশু শিব তেঽঙ্ঘ্রিযুগাম্বুজম্ ।

অর্চযন্তঃ সদা ধন্যা ভবাম শরদশ্শতম্ ॥ ৩৫ ॥

ত্বৎকীর্তনং সদা ভক্ত্যা সর্বকল্মষনাশনম্ ।

শঙ্করাঘহর স্বামিন্ শৃণবাম শরদশ্শতম্ ॥ ৩৬॥

ত্বচ্চরিত্রং পবিত্রং চ সর্বদারিদ্র্যনাশনম্ ।
অস্মৎপুত্রপ্রণপ্তৄণাং প্রব্রবাম শরদশ্শতম্ ॥ ৩৭॥

ত্বদ্ভক্তকল্পকতরুমাশ্রযন্তস্সদা বযম্ ।
ইন্দ্রিযাঘৌঘনিচযৈরজীতাস্স্যাম শরদশ্শতম্ ॥ ৩৮॥

এবং স্তুত্বা মহাদেবী মহালক্ষ্মীর্মনোহরা ।
প্রণম্য চিৎসভানাথং তিষ্ঠন্তী মুদিতাননা ॥ ৩৯॥

মন্মাঙ্গল্যস্য রক্ষাযৈ মন্ত্রমেকং মমাদিশ ।
তাং দৃষ্ট্বা চ মহাদেবঃ প্রহসন্নিদমব্রবীত্ ॥ ৪০॥

ত্বং শীঘ্রং গচ্ছ দেবেশীং শিবকামাং চ সুন্দরীম্ ।
তত্র গত্বা মহেশানীং পূজয ত্বং বিশেষতঃ ॥ ৪১॥

সহস্রকুসুমৈঃ পদ্মৈঃ নৈবেদ্যৈশ্চ মনোহরৈঃ ।
ইত্যুক্ত্বা পরমপ্রীতো ভগবান্ভক্তবৎসলঃ ॥ ৪২॥

শিবকামসুন্দরীনাম্নাং সহস্রং প্রজগাদ হ ।
উপদিশ্য চ তাং দেবীং প্রেষযামাস শঙ্করঃ ॥ ৪৩॥

লক্ষ্মীর্গত্বা মহেশানীং শিবকামীং মুদান্বিতা ।

শিবোক্তেন প্রকারেণ সহস্রৈঃ পঙ্কজৈঃ ক্রমাত্ ॥ ৪৪॥

নামভিশ্চ ত্রিতারৈশ্চ যুক্তৈশ্চ সুমহত্তরৈঃ ।

পূজযামাস বিধিবত্ শিবাচিন্তনতৎপরা ॥ ৪৫॥

তদা শিবঃ শোধনায তস্যাঃ চিত্তং জগৎপ্রভুঃ ।

আনীতেষু চ পদ্মেষু ন্যূনমেকং চকার হি ॥ ৪৬॥

অতীব দুঃখিতালক্ষ্মীঃ পূর্তিকামেচ্ছযা স্বযম্ ।

অভাবপুষ্পসম্পূর্ত্যৈ নেত্রমুৎপাট্য বামকম্ ॥ ৪৭॥

অর্চযামাস লক্ষ্মীশ্চ ভক্ত্যা পরমযা যুতা ।

দৃষ্টৈবদং সুন্দরীদেবী শিবকামমনোহরী ॥ ৪৮॥

পূর্বস্মাদপি সৌন্দর্যং নেত্রং দত্বাঽতিহর্ষতঃ ।

তুষ্টাঽহমিষ্টং ব্রিযতাং বরমিত্যাহ শঙ্করী ॥ ৪৯॥

তদা বব্রে মহালক্ষ্মীঃ সর্বলোকপ্রিযঙ্করম্ ।

সৌমঙ্গল্যং কুরু মম দীর্ঘং চ ভবতু ধ্রুবম্ ।

তথা ভবতু ভদ্রং তে বিষ্ণুং গচ্ছ যথাসুখম্ ॥ ৫০॥

ইত্যুক্ত্বাঽন্তর্দধে দেবী শিবকামী মহেশ্বরী ।

লক্ষ্মীশ্চ বিষ্ণুং গত্বাঽথ যথাপূর্বং স্থিতোরসি ॥ ৫১॥

তাদৃশং নামসাহস্রং শিবকাম্যাঃ মনোহরম্ ।

বদামি শৃণু হে দেবীনামসাহস্রমুত্তমম্ ॥ ৫২॥

ঋষিঃ ছন্দো দেবতা চ বীজং শক্তিশ্চ কীলকম্ ।

করাঙ্গন্যাসকৌ পূর্বং সুরহস্যং মহেশ্বরি ॥ ৫৩॥

নাম্নাং ত্রিপুরসুন্দর্যাঃ যৎপ্রোক্তং তদ্বদেব হি ।

শিবকামসুন্দরীপ্রীত্যৈ বিনিযোগো জপে স্মৃতঃ ॥ ৫৪॥

দিগ্বন্ধং ততো ধ্যায়েত্ শিবকামীং মহেশ্বরীম্ ।

ততশ্চ পঞ্চপূজা চ কর্তব্যা মনুজাপিনা ॥ ৫৫॥

ততঃ পরং স্তোত্রমেতজ্জপ্তব্যং ভদ্রকামিনা ।

স্তোত্রান্তে চ প্রকর্তব্যমঙ্গন্যাসং চ পূর্ববত্ ॥ ৫৬॥

কৃত্বা চ দিগ্বিমোকং চ ততোধ্যায়েচ্চ সুন্দরীম্ ।

লমিত্যাদিমমন্ত্রৈশ্চ পঞ্চপূজাং চ সংবদেত্ ॥ ৫৭॥

ওঁ অস্য শ্রী শিবকামসুন্দরীসহস্রনামস্তোত্রমহা

মন্ত্রস্য । আনন্দভৈরবদক্ষিণামূর্তিঃ ঋষিঃ । দেবী গায়ত্রী

ছন্দঃ । শ্রীশিবকামসুন্দরী দেবতা । বীজং শক্তিঃ কীলকং

করাঙ্গন্যাসৌ চ শ্রীমহাত্রিপুরসুন্দরীমহামন্ত্রবত্ ।

॥ ধ্যানম্ ॥

পদ্মস্থাং কনকপ্রভাং পরিলসৎপদ্মাক্ষিযুগ্মোৎপলাম্

অক্ষস্রক্শুকশারিকাকটিলসত্ কল্হার হস্তাব্জিনীম্ ।

রক্তস্রক্সুবিলেপনাম্বরধরাং রাজীবনেত্রার্চিতাং

ধ্যায়েত্ শ্রীশিবকামকোষ্ঠনিলযাং নৃত্তেশ্বরস্য প্রিয়াম্ ॥

মুক্তাকুন্দেন্দুগৌরাং মণিময়মকুটাং রত্নতাণ্টঙ্কযুক্তাং

অক্ষস্রকপুষ্পহস্তা সশুককটিকরাং চন্দ্রচূডাং ত্রিনেত্রীম্ ।

নানালঙ্কারযুক্তাং সুরমকুটমণিদ্যোতিত স্বর্ণপীঠাং

যাসাপদ্মাসনস্থাং শিবপদসহিতাং সুন্দরীং চিন্তয়ামি ॥

রত্নতাটঙ্কসংযুক্তাং সুবর্ণকবচান্বিতাম্ ।

দক্ষিণোর্ধ্বকরাগ্রেণ স্বর্ণমালাধরাং শুভাম্ ॥

দক্ষাধঃ করপদ্মেন পুল্লকল্হার ধারিণীম্ ।

বামেনোএধ্বকরাব্জেন শুকার্ভকধরাং বরাম্ ।

কটিদেশে বামহস্তং ন্যস্যন্তীং চ সুদর্শনাম্ ॥

শিবকামসুন্দরীং নৌমি প্রসন্নবদনাং শিবাম্ ।

লমিৎপাদিপঞ্চপূজা ॥

॥ শ্রী শিবকামসুন্দরীসহস্রনামস্তোত্রম্ ॥

ওঁ ঐং হ্রীং শ্রীং অং - ১॥

অগণ্যাঽগণ্যমহিমাঽসুরপ্রেতাসনস্থিতা ।

অজরাঽমৃত্যুজননাঽপ্যকালান্তক ভীকরা ॥ ১॥

অজাঽজাংশসমুদ্ভূতাঽমরালীবৃতগোপুরা ।

অত্যুগ্রাজিনটচ্ছত্রুকবন্ধানেককোটিকা ॥ ২॥

অদ্রিদুর্গাঽণিমাসিদ্ধিদাপিতেষ্টামরাবলিঃ ।

অনন্তাঽনন্যসুলভপ্রিযাঽদ্ভুতবিভূষণা ॥ ৩॥

অনূরুকরসঙ্কাশাঽখণ্ডানন্দস্বরূপিণী ।

অন্ধীকৃতদ্বিজারাতিনেত্রাঽত্যুগ্রাট্টহাসিনী ॥ ৪॥

অন্নপূর্ণাঽপরাঽলক্ষ্ম্যাঽম্বিকাঽঘবিনাশিনী ।

অপারকরুণাপূরনিভরেখাং জনাক্ষিণী ॥ ৫॥

অমৃতাম্ভোধিমধ্যস্থাঽণিমাসিদ্ধিমুখাশ্রিতা ।

অরবিন্দাক্ষমালালিপাত্রশূলধরাঽনঘা ॥ ৬॥

অশ্বমেধমখাবাপ্তহবিঃপুজকৃতাদরা ।

অশ্বসেনাবৃতাঽনেকপারূঢাঽপ্যগজন্মভূঃ ॥ ৭॥

ওং ঐং হ্রীং শ্রীং আং - ২॥

আকাশবিগ্রহাঽঽনন্দদাত্রী চাজ্ঞাব্জভাসুরা ।

আচারতৎপরস্বান্তপদ্মসংস্থাঽঽঢ্যপূজিতা ॥ ৮॥

আত্মাযত্তজগচ্চক্রা চাত্মারামপরাযণা ।

আদিত্যমণ্ডলান্তস্থা চাদিমধ্যান্তবর্জিতা ॥ ৯॥

আদ্যন্তরহিতাঽচার্যা চাদিক্ষান্তার্ণরূপিণী ।

আদ্যাঽমাত্যনুতা চাজ্যহোমপ্রীতাঽঽবৃতাঙ্গনা ॥ ১০॥

আধারকমলারূঢা চাধারাধেযবিবর্জিতা ।

আধিহীনাঽঽসুরীদুর্গাঽঽজিসঙ্ক্ষোভিতাসুরা ॥ ১১॥

আধোরণাজ্ঞাশুণ্ডাগ্রাকৃষ্টাসুরগজাবৃতা ।

আশ্চর্যবিযহাঽঽচার্যসেবিতাঽঽগমসংস্তুতা ॥ ১২॥

আশ্রিতাখিলদেবাদিবৃন্দরক্ষণতৎপরা ।

ওঁ ঐং হ্রীং শ্রীং ইং - ৩॥

ইচ্ছাজ্ঞানক্রিয়াশক্তিরূপেরাবতিসংস্তুতা ॥ ১৩॥

ইন্দ্রাণীরচিতশ্বেতচ্ছত্রেডাভক্ষণপ্রিয়া ।

ইন্দ্রাক্ষীন্দ্রার্চিতেন্দ্রাণী চেন্দিরাপতিসোদরী ॥ ১৪ ॥

ইন্দিরেন্দীবরশ্যামা চেরম্মদসমপ্রভা ।

ইভকুম্ভাভবক্ষোজদ্বয়া চেক্ষুধনুর্ধরা ॥ ১৫॥

ইভদন্তোরুনয়না চেন্দ্রগোপসমাকৃতিঃ ।

ইভশুণ্ডোরুযুগলাচেন্দুমণ্ডলমধ্যগা ॥ ১৬॥

ইষ্টার্তিঘ্নীষ্টবরদা চেভবক্ত্রপ্রিয়ঙ্করী ।

ওঁ ঐং হ্রীং শ্রীং ঈং - ৪ ॥

ঈশিত্বসিদ্ধিসম্প্রার্থিতাপসেষৎস্মিতাননা ॥ ১৭॥

ঈশ্বরীশপ্রিয়া চেশতাণ্ডবালোকনোত্সুকা ।

ঈক্ষণোৎপন্নভুবনকদম্বা চেড্যবৈভবা ॥ ১৮॥

ওঁ ঐং হ্রীং শ্রীং উং - ৫॥

উচ্চনীচাদিরহিতাঽপ্যুরুকান্তারবাসিনী ।

উৎসাহরহিতেন্দ্রারিশ্চোরুসন্তোষিতামরা ॥ ১৯॥

উদাসীনোডুরাবক্ত্রাঽপ্যুগ্রকৃত্যবিদূষণী ।

উপাধিরহিতোপাদানকারণোন্মত্তনৃত্তকী ॥ ২০॥

উরুস্যন্দনসম্বদ্ধকোট্যশ্বোরুপরাক্রমা ।

উল্কামুখী হ্যুমাদেবী চোন্মত্তক্রোধভৈরবী ॥ ২১॥

ওঁ ঐং হ্রীং শ্রীং ঊং - ৬॥

ঊর্জিতজ্জোঢভুবনকদম্বোর্ধ্বমুখাবলিঃ ।

ঊর্ধ্বপ্রসারিতাঙ্ঘ্রীশদর্শনোদ্বিগ্নমানসা ॥ ২২॥

ঊহাপোহবিহীনোরুজিতরম্ভামনোহরা ।

ওঁ ঐং হ্রীং শ্রীং ঋং - ৭॥

ঋগ্বেদসংস্তুতা ঋদ্ধিদাযিনী ঋণমোচিনী ॥ ২৩॥

ঋজুমার্গপরপ্রীতা ঋষভধ্বজভাসুরা ।

ঋদ্ধিকামমুনিব্রাতসত্রযাগসমর্চিতা ॥ ২৪॥

ওঁ ঐং হ্রীং শ্রীং ৠং - ৮॥

ঞ্ঝকারবাচ্যা ঞ্ঝক্ষাদিবৃতা ঞ্ঝকারনাসিকা ।

ॐ ঐং হ্রীং শ্রীং ঌং - ৯॥

ঌকরিণী ঌকারোষ্ঠা

ॐ ঐং হ্রীং শ্রীং ৡং - ১০॥

ৡবর্ণাধরপল্লবা ॥ ২৫॥

ॐ ঐং হ্রীং শ্রীং এং - ১১॥

একাকিন্যেকমন্ত্রাক্ষরৈর্ধিতোৎসাহবল্লভা ।

ॐ ঐং হ্রীং শ্রীং ঐং - ১২॥

ঐশ্বর্যদাত্রী

ॐ ঐং হ্রীং শ্রীং ওং - ১৩॥

চোঙ্কারবাদিবাগীশসিদ্ধিদা ॥ ২৬॥

ওজঃপুঞ্জঘনীসান্দ্ররূপিণ্যোঙ্কারমধ্যগা ।

ওষধীশমনুপ্রীতা

ॐ ঐং হ্রীং শ্রীং ঔং - ১৪॥

চৌদার্যগুণাবারিধিঃ ॥ ২৭॥

ঔপম্যরহিতাচৈব

ॐ ঐং হ্রীং শ্রীং অং - ১৫॥

অম্বুজাসনসুন্দরী ।

অম্বরাধীশনটনসাক্ষিণী

ॐ ঐং হ্রীং শ্রীং অঃ - ১৬॥

অঃ পদদাযিনী ॥ ২৮॥

ॐ ঐং হ্রীং শ্রীং কং - ১৭॥

কবরীবন্ধমুখরীভমরভ্রমরালকা ।

করবাললতাধারাভীষণা কৌমুদীনিভা ॥ ২৯॥

কর্পূরাম্বা কালরাত্রিঃ কালী কলিবিনাশিনী ।

কাদিবিদ্যামযী কাম্যা কাঞ্চনাভা কলাবতী ॥ ৩০॥

কামেশ্বরী কামরাজমনুপ্রীতা কৃপাবতী ।

কার্তবীর্যদ্বিসাহস্রদোর্দণ্ডপটহধ্বনিঃ ॥ ৩১॥

কিটিবক্ত্রাধিকারোদ্যদ্গণপ্রোৎসাহিতাঙ্গনা ।
কীর্তিপ্রদা কীর্তিমতী কুমারী কুলসুন্দরী ॥ ৩২ ॥

কুন্তায়ুধধরা কুব্জিকাম্বা কুধ্রবিহারিণী ।
কুলাগমরহস্যজ্ঞবাঞ্ছাদানপরায়ণা ॥ ৩৩॥

কূটস্থিতিজুষী কূর্মপৃষ্ঠজিৎপ্রপদান্বিতা ।
কেকাশব্দতিরস্কারিবাণাসনমণীরবা ॥ ৩৪ ॥

কেশাকেশিচণা কেশিরাক্ষসাধিপমর্দিনী ।
কৈতকচ্ছদসন্ধ্যাভপিশঙ্গিতকচাম্বুদা ॥ ৩৫ ॥

কৈলাসোত্তুঙ্গশৃঙ্গাদ্রবিলাসেশপরাজিতা ।
কৈশিক্যারভটীরীতিস্তুতরক্তেশ্বরীপ্রিয়া ॥ ৩৬॥

কোকাহিতকরস্পর্ধিনখা কোকিলবাদিনী ।
কোপহুঙ্কারসন্ত্রস্তসসেনাসুরনায়কা ॥ ৩৭ ॥

কোলাহলরবোদ্রেকরিঞ্খজ্জম্বুকমণ্ডলা ।
কৌণ্ডিন্যান্বয়সম্ভূতা করিচর্মাম্বরপ্রিয়া ॥ ৩৮ ॥

কৌপীনশিষ্টবিপ্রর্ষিস্তুতা কৌলিকদেশিকা ।

কৌসুম্ভাস্তরণা কৌলমার্গনিষ্ঠান্তরাস্থিতা ॥ ৩৯॥

কঙ্কণাহিগণক্ষেমবচনোদ্বিগ্নতার্ক্ষ্যকা ।

কঞ্জাক্ষী কঞ্জবিনুতা কঞ্জজাতিপ্রিযঙ্করী ॥ ৪০॥

ওঁ ঐং হ্রীং শ্রীং খং - ১৮॥

খড্গখেটকদোর্দণ্ডা খট্বাঙ্গী খড্গসিদ্ধিদা ।

খণ্ডিতাসুরগর্বাদ্রিঃ খলাদৃষ্টস্বরূপিণী ॥ ৪১॥

খণ্ডেন্দুমৌলিহৃদযা খণ্ডিতার্কেন্দুমণ্ডলা ।

খরাংশুতাপশমনী খস্থা খেচরসংস্তুতা ॥ ৪২॥

খেচরী খেচরীমুদ্রা খেচরাধীশবাহনা ।

খেলাপারাবতরতিপ্রীতা খাদ্যাযিতান্তকা ॥ ৪৩॥

ওং ঐং হ্রীং শ্রীং গং - ১৯॥

গগনা গগনান্তস্থা গগনাকারমধ্যমা ।

গজারূঢা গজমুখী গাথাগীতামরাঙ্গনা ॥ ৪৪॥

গদাধরী গদাঽঽঘাতমূর্ছিতানেকপাসুরা ।

গরিমালঘিমাসিদ্ধিবৃতা গ্রামাদিপালিনী ॥ ৪৫॥

গর্বিতা গন্ধবসনা গন্ধবাহসমর্চিতা ।

গর্বিতাসুরদারাশ্রুপঙ্কিতাজিবসুন্ধরা ॥ ৪৬॥

গায়ত্রী গানসন্তুষ্টা গন্ধর্বাধিপতীডিতা ।

গিরিদুর্গা গিরীশানসুতা গিরিবরাশ্রয়া ॥ ৪৭॥

গিরীন্দ্রক্রূরকঠিনকর্ষদ্ধ্বলবরায়ুধা ।

গীতচারিত্রহরিতশুকৈকগতমানসা ॥ ৪৮॥

গীতিশাস্ত্রগুরুঃ গীতিহৃদয়া গীর্গিরীশ্বরী ।

গীর্বাণদনুজাচার্যপূজিতা গৃধ্রবাহনা ॥ ৪৯॥

গুডপায়সসন্তুষ্টহৃদ্যপ্ততরযোগিনী ।

গুণাতীতা গুরুর্গৌরী গোপ্ত্রী গোবিন্দসোদরী ॥ ৫০॥

গুরুমূর্তির্গুণাম্ভোধির্গুণাগুণবিবর্জিতা ।

গুহেষ্টদা গুহাবাসিযোগিচিন্তিতরূপিণী ॥ ৫১॥

গুহ্যাগমরহস্যজ্ঞা গুহ্যকানন্দদায়িনী ।

গুহ্যা গুহ্যার্চিতা গুহ্যস্থানবিন্দুস্বরূপিণী ॥ ৫২॥

গোদাবরীনদীতীরবাসিনী গুণবর্জিতা ।

গোমেদকমণীকর্ণকুণ্ডলা গোপপালিনী ॥ ৫৩॥

গোসবাসক্তহৃদযা গোশৃঙ্গধ্যানমোদিনী ।

গঙ্গাগর্বঙ্কষোদ্যুক্তরুদ্রপ্রোৎসাহবাদিনী ॥ ৫৪ ॥

গন্ধর্ববনিতামালামোদিনী গর্বনাশিনী ।

গুঞ্জামণিগণপ্রোতমালাভাসুরকন্ধরা ॥ ৫৫ ॥

ওং ঐং হ্রীং শ্রীং ঘং - ২০॥

ঘটবাদ্যপ্রিযা ঘোরকোণপঘ্নী ঘটার্গলা ।

ঘটিকা ঘটিকামুখ্যষট্পারাযণমোদিনী ॥ ৫৬॥

ঘণ্টাকর্ণাদিবিনুতা ঘনজ্যোতির্লতানিভা ।

ঘনশ্যামা ঘটোৎভূততাপসাত্মার্থদেবতা ॥ ৫৭ ॥

ঘনসারানুলিপ্তাঙ্গী ঘোণোদ্ধৃতবসুন্ধরা ।

ঘনস্ফটিকসঙ্ক্লৃপ্তসালান্তরকদম্বকা ॥ ৫৮॥

ঘনালুদ্ভেদশিখরগোপুরানেকমন্দিরা ।

ঘূর্ণীতাক্ষী ঘৃণাসিন্ধুঃ ঘৃণিবিদ্যা ঘটেশ্বরী ॥ ৫৯॥

ঘৃতকাতিন্যহৃদ্ঘণ্টামণিমালাপ্রসাধনা ।

ঘোরকৃত্যা ঘোরবাদ্যা ঘোরাঘৌঘবিনাশিনী ॥ ৬০॥

ঘোরাঘনকৃপাযুক্তা ঘননীলাম্বরান্বিতা ।

ঘোরাস্যা ঘোরশূলাগ্রপ্রোতাসুরকলেবরা ॥ ৬১॥

ঘোষত্রস্তান্তকভটা ঘোরসঙ্ঘোষকৃদ্বলা ।

ॐ ঐং হ্রীং শ্রীং ঙং - ২১॥

ঙান্তার্ণাদ্যমনুপ্রীতা ঙাকারাডীম্পরাযণা ॥ ৬২॥

ঙীকারিমমঞ্জুমঞ্জীরচরণা ঙাঙ্কিতাঙ্গুলিঃ ।

ওং ঐ হ্রীং শ্রীং চং - ২২॥

চক্রবর্তিসমারাধ্যা চক্রনেমিরবোত্সুকা ॥ ৬৩॥

চণ্ডমার্ণ্ডধিক্কারিপ্রভা চক্রাধিনাযিকা ।

চণ্ডালাস্যপরামোদা চণ্ডবাদপটীযসী ॥ ৬৪॥

চণ্ডিকা চণ্ডকোদণ্ডা চণ্ডঘ্নী চণ্ডভৈরবী ।

চতুরা চতুরাম্নাযশিরোলক্ষিতরূপিণী ॥ ৬৫॥

চতুরঙ্গবলোপেতা চরাচরবিনোদিনী ।

চতুর্বক্ত্রা চক্রহস্তা চক্রপাণিসমর্চিতা ॥ ৬৬॥

চতুষ্ষষ্টিকলারূপা চতুষ্ষষ্যর্চ্চনোত্সুকা ।

চন্দ্রমণ্ডলমধ্যস্থা চতুর্বর্গফলপ্রদা ॥ ৬৭॥

চমরীমৃগযোদ্যুক্তা চিরঞ্জীবিত্বদায়িনী ।

চম্পকাশোকস্রগ্বদ্ধচিকুরা চরুভক্ষিণী ॥ ৬৮॥

চরাচরজগদ্ধাত্রী চন্দ্রিকাধবলস্মিতা ।

চর্মাম্বরধরা চণ্ডক্রোধহুঙ্কারভীকরা ॥ ৬৯॥

চাটুবাদপ্রিয়া চামীকরপর্বতবাসিনী ।

চাপিনী চাপমুক্তেষুচ্ছন্নদিগ্ভ্রান্তপন্নগা ॥ ৭০॥

চিত্রভানুমুখী চিত্রসেনা চিত্রাঙ্গদেষ্টদা ।

চিত্রলেখা চিদাকাশমধ্যগা চিন্তিতার্থদা ॥ ৭১॥

চিন্ত্যা চিরন্তনী চিত্রা চিত্রাম্বা চিত্তবাসিনী ।

চৈতন্যরূপা চিচ্ছক্তিশ্চিদম্বরবিহারিণী ॥ ৭২॥

চোরঘ্নী চীর্যবিমুখা চতুর্দশমনুপ্রিয়া ।

ওং ঐং হ্রীং শ্রীং ছং - ২৩॥

ছত্রচামরভৃল্লক্ষ্মীবাগিন্দ্রাণীরতীবৃতা ॥ ৭৩॥

ছন্দশ্শাস্ত্রমযী ছন্দোলক্ষ্যাচ্ছেদবিবর্জিতা ।

ছন্দোরূপাছন্দগতিঃ ছন্দশ্শিরবিহারিণী ॥ ৭৪ ॥

ছদ্মহৃৎছবিসন্দীপ্তসূর্যচন্দ্রাগ্নিতারকা ।

ছর্দিতাণ্ডাবলিশ্ছাদিতাকারা ছিন্নসংশযা ॥ ৭৫ ॥

ছাযাপতিসমারাধ্যা ছাযাম্বা ছত্রসেবিতা ।

ছিন্নমস্তাবিকা ছিন্নশীর্ষশত্রুশ্ছলান্তকী ॥ ৭৬॥

ছেদিতাসুরজিহ্বাগ্রা ছত্রীকৃতযশস্বিনী ।

ॐ ঐং হ্রীং শ্রীং জং - ২৪ ॥

জগন্মাতা জগৎসাক্ষী জগদ্যোনির্জগদ্গুরুঃ ॥ ৭৭ ॥

জগন্মাযা জগদ্বৃন্দবন্দিতা জযিনীজযা ।

জনজাড্যপ্রতাপঘ্নী জিতাসুরমহাব্রজা ॥ ৭৮॥

জননী জগদানন্দদাত্রী জহ্নুসমর্চিতা ।

জপমালাবরাভীতিমুদ্রাপুস্তকধারিণী ॥ ৭৯॥

জপযজ্ঞপরাধীনহৃদযা জগদীশ্বরী ।

জপাকুসুমসঙ্কাশা জন্মাদিধ্বংসকারণা ॥ ৮০॥

জালধ্রপূর্ণকামোড্যাণচতুষ্পীঠরূপিণী ।

জীবনার্থিদ্বিজব্রাতত্রাণনাবদ্ধকঙ্কণা ॥ ৮১॥

জীবব্রহ্মৈকতাকাঙ্ক্ষি জনতাকীর্ণপার্বভূঃ ।

জস্তিনী জম্ভভিৎপূল্যা জাগ্রদাদিত্রযাতিগা ॥ ৮২॥

জলদগ্রিধরা জ্বালাপ্রোচ্চকেশী জ্বরার্তিহৃত্ ।

জ্বালামালিনিকা জ্বালামুখী জৈমিনিসংস্তুতা ॥ ৮৩॥

ওঁ ঐং হ্রীং শ্রীং ঝং - ২৫॥

ঝলঞ্ঝলকৃতস্বর্ণমঞ্জীরা ঝষলোচনা ।

ঝষকুণ্ডলিনী ঝল্লরীবাদ্যমুদিতাননা ॥ ৮৪॥

ঝষকেতুসমারাধ্যা ঝষমাংসান্নভক্ষিণী ।

ঝষোপদ্রবকৃদ্ধন্ত্রী ঝ্ম্রূম্মন্ত্রাধিদেবতা ॥ ৮৫॥

ঝঞ্ঝানিলাতিগমনা ঝষরান্নীতসাগরা ।

ওঁ ঐং হ্রীং শ্রীং ঞং - ২৬॥

জ্ঞানমুদ্রাধরা জ্ঞানিহৃৎপদ্মকুহরাস্থিতা ॥ ৮৬॥

জ্ঞানমূর্তিজ্ঞনিগম্যা জ্ঞানদা জ্ঞাতিবর্জিতা ।

জ্ঞেযা জ্ঞেযাদিরহিতা জ্ঞাত্রী জ্ঞানস্বরূপিণী ॥ ৮৭॥

ওং ঐং হ্রীং শ্রীং টং - ২৭॥

টঙ্কপুষ্পালিস্রগ্ঝঞ্জুকন্ধরা টঙ্কিতাচলা ।

টঙ্কবেত্রাদিকানেকশস্ত্রভৃদ্দোর্লতাবলিঃ ॥ ৮৮॥

ওং ঐ হ্রীং শ্রীং ঠং - ২৮॥

ঠকারনিভবক্ষোজদ্বযাধোবৃত্তভাসুরা ।

ঠকারাঙ্কিতজাম্বগ্রজিতকোরকিতাম্বুজা ॥ ৮৯॥

ওং ঐং হ্রীং শ্রীং শং - ২৯॥

ডাকিনী ডামরীতন্ত্ররূপা ডাডিমপাটলা ।

ডম্বঘ্নী ডম্বরাঽঽডম্বরোন্মুখী ডমরুপ্রিযা ॥ ৯০॥

ডিম্বদানচণা ডোলামুদিতা ডুণ্ঠিপূজিতা ।

ওং ঐং হ্রীং শ্রীং ঢং - ৩০॥

ঢকানিনদসন্তুষ্টশিখিনৃত্তসমুৎসুকা ॥ ৯১॥

ওং ঐং হ্রীং শ্রীং ণং - ৩১॥

ণকারপঞ্জরশুকী ণকারোদ্যানকোকিলা ।

ওং ঐং হ্রীং শ্রীং তং - ৩২॥

তত্ত্বাতীতা তপোলক্ষ্যা তপ্তকাঞ্চনসন্নিভা ॥ ৯২॥

তন্ত্রী তত্ত্বমসীবাক্যবিষযা তরুণীবৃতা ।

তর্জন্যঙ্গুষ্ঠসংযোগজ্ঞানব্রহ্মমুনীশ্বরা ॥ ৯৩॥

তর্জিতানেকদনুজা তক্ষকী তডিতালিভা ।

তাম্রচূডধ্বজোৎসঙ্গা তাপত্রযবিনাশিনী ॥ ৯৪॥

তারাম্বা তারকী তারাপূজ্যা তাণ্ডবলোলুপা ।

তিলোত্তমাদিদেবস্ত্রীশারীরোৎসুকমানসা ॥ ৯৫॥

তিল্বদ্রুসঙ্কুলাভোগকান্তারান্তরবাসিনী ।

ত্রযীদ্বিড্রসনারক্তপানলোলাসিধারিণী ॥ ৯৬॥

ত্রযীমযী ত্রযীবেদ্যা ত্র্যয্যন্তোদ্গীতবৈভবা ।

ত্রিকোণস্থা ত্রিকালজ্ঞা ত্রিকূটা ত্রিপুরেশ্বরী ॥ ৯৭॥

ত্রিচত্বারিংশদশ্রাঙ্কচক্রান্তর্বিন্দুসংস্থিতা ।

ত্রিতারা তুম্বুরূদ্গীতা তার্ক্ষ্যাকারা ত্রিকাগ্নিজা ॥ ৯৮॥

ত্রিপুরা ত্রিপুরধ্বংসিপ্রিযা ত্রিপুরসুন্দরী ।

ত্রিস্থা ত্রিমূর্তিসহজশক্তিস্ত্রিপুরভৈরবী ॥ ৯৯॥

ওঁ ঐং হ্রীং শ্রীং থং - ৩৩॥

থাং থীকরমৃদগাদিভৃদ্বিষ্ণুমুখসেবিতা ।

থাং থীং তক্তক থিং তোকৃত্তালধ্বনিসভাঙ্গণা ॥ ১০০॥

ওঁ ঐং হ্রীং শ্রীং দং - ৩৪॥

দক্ষা দাক্ষাযণী দক্ষপ্রজাপতিমখান্তকী ।

দক্ষিণাচাররসিকা দযাসম্পূর্ণমানসা ॥ ১০১॥

দারিদ্রযোন্মূলিনী দানশীলা দোষবিবর্জিতা ।

দারুকান্তকরী দারুকারণ্যমুনিমোহিনী ॥ ১০২॥

দীর্ঘদংষ্ট্রাননা দীর্ঘরসনাগীর্ণদানবা ।

দীক্ষিতা দীক্ষিতারাধ্যা দীনসংরক্ষণোদ্যতা ॥ ১০৩॥

দুঃখাব্ধিবডবা দুর্গা দুর্বীজা দুরিতাপহা ।

দুষ্টদূরা দুরাচারশমনী দ্যূতবেদিনী ॥ ১০৪॥

দ্বিজাবগূরণস্বান্তপিশিতামোদিতাশুজা ।

ওঁ ঐং হ্রীং শ্রীং ধং - ৩৫॥

ধনদা ধনদারাধ্যা ধনদাপ্তকুটুম্বিনী ॥ ১০৫॥

ধরাধরাত্মজা ধর্মরূপা ধরণিধূর্ধরা ।

ধাত্রী ধাতৃশিরচ্ছেত্রী ধীধ্যেযা ধ্রুবপূজিতা ॥ ১০৬॥

ধূমাবতী ধূম্রনেত্রগর্বসংহারিণী ধৃতিঃ ।

ওঁ ঐং হ্রীং শ্রীং নং - ৩৬॥

নখোৎপন্নদশাকারমাধবা নকুলীশ্বরী ॥ ১০৭॥

নরনারাযণস্তুত্যা নলিনাযতলোচনা ।

নরাস্থিস্রগ্ধরা নারী নরপ্রেতোপরিস্থিতা ॥ ১০৮॥

নবাক্ষরীনামমন্ত্রজপপ্রীতা নটেশ্বরী ।

নাদচামুণ্ডিকা নানারূপকৃন্নাস্তিকান্তকী ॥ ১০৯॥

নাদব্রহ্মমযী নামরূপহীনা নতাননা ।

নারাযণী নন্দিবিদ্যা নারদোদ্গীতবৈভবা ॥ ১১০॥

নিগমাগমসংবেদ্যা নেত্রী নীতিবিশারদা ।

নির্গুণা নিত্যসন্তুষ্টা নিত্যাষোডশিকাবৃতা ॥ ১১১॥

নৃসিংহদর্পশমনী নরেন্দ্রগণবন্দিতা ।

নৌকারূঢাসমুত্তীর্ণভবাম্ভোধি নিজাশ্রিতা ॥ ১১২॥

ওং ঐং হ্রীং শ্রীং পং - ৩৭॥

পরমা পরমং জ্যোতিঃ পরব্রহ্মমযী পরা ।

পরাপরমযী পাশবাণাঙ্কুশধনুর্ধরা ॥ ১১৩॥

পরাপ্রাসাদমন্ত্রার্থা পতঞ্জলিসমর্চিতা ।

পাপঘ্নী পাশরহিতা পার্বতী পরমেশ্বরী ॥ ১১৪॥

পুণ্যা পুলিন্দিনীপূজ্যা প্রাজ্ঞা প্রজ্ঞানরূপিণী ।
পুরাতনা পরাশক্তিঃ পঞ্চবর্ণস্বরূপিণী ॥ ১১৫॥

প্রত্যঙ্গিরাঃ পানপাত্রধরা পীনোন্নতস্তনী ।
ওং ঐং হ্রীং শ্রীং ফং - ৩৮॥

ফডর্ণধ্বস্তপাপৌঘদাসা ফণিবরেডিতা ॥ ১১৬॥

ফণিরত্নাসনাসীনকামেশোৎসঙ্গবাসিনী ।
ফলদা ফল্গুনপ্রীতা ফুল্লাননসরোরুহা ॥ ১১৭॥

ফুল্লোত্তপ্তাঙ্গসাহস্রদলপঙ্কজভাসুরা ।
ওং ঐং হ্রীং শ্রীং বং - ৩৯॥

বন্ধূকসুমনোরাগা বাদরাযণদেশিকা ॥ ১১৮॥

বালাম্বা বাণকুসুমা বগলামুখিরূপিণী ।
বিন্দুচক্রস্থিতা বিন্দুতর্পণপ্রীতমানসা ॥ ১১৯॥

বৃহৎসামস্তুতা ব্রহ্মমাযা ব্রহ্মর্ষিপূজিতা ।
বৃহদৈশ্বর্যদা বন্ধহীনা বুধসমর্চিতা ॥ ১২০॥

ব্রহ্মচামুণ্ডিকা ব্রহ্মজননী ব্রাহ্মণপ্রিয়া ।

ব্রহ্মজ্ঞানপ্রদা ব্রহ্মবিদ্যা ব্রহ্মাণ্ডনায়িকা ॥ ১২১॥

ব্রহ্মতালপ্রিয়া ব্রহ্মপঞ্চমঞ্চকশায়িনী । (??)

ব্রহ্মাদিবিনুতা ব্রহ্মপত্নী ব্রহ্মপুরস্থিতা ॥ ১২২॥

ব্রাহ্মীমাহেশ্বরীমুখ্যশক্তিবৃন্দসমাবৃতা ।

ওং ঐং হ্রীং শ্রীং ভং - ৪০॥

ভগারাধ্যা ভগবতী ভার্গবী ভার্গবার্চিতা ॥ ১২৩॥

ভণ্ডাসুরশিরশ্ছেত্রী ভাষাসর্বস্বদর্শিনী ।

ভদ্রা ভদ্রার্চিতা ভদ্রকালী ভর্গস্বরূপিণী ॥ ১২৪॥

ভবানী ভাগ্যদা ভীমা ভামতী ভীমসৈনিকা ।

ভুজঙ্গনটনোদ্যুক্তা ভুজনির্জিতদানবা ॥ ১২৫॥

ভ্রুকুটীক্রূরবদনা ভ্রূমধ্যনিলয়স্থিতা ।

ভেতালনটনপ্রীতা ভোগিরাজাঙ্গুলীয়কা ॥ ১২৬॥

ভেরুণ্ডা ভেদনির্মুক্তা ভৈরবী ভৈরবার্চিতা ।

ওং ঐং হ্রীং শ্রীং মং - ৪১॥

মণিমণ্ডপমধ্যস্থা মাণিক্যাভরণান্বিতা ॥ ১২৭॥

মনোন্মনী মনোগম্যা মহাদেবপতিব্রতা ।

মন্ত্ররূপা মহারাজ্ঞী মহাসিদ্ধালিসংবৃতা ॥ ১২৮॥

মন্দরাদিকৃতাবাসা মহাদেবী মহেশ্বরী ।

মহাহিধমেখলা মার্গদুর্গা মাঙ্গল্যদাযিনী ॥ ১২৯॥

মহাবতক্রতুপ্রীতা মাণিভদ্রসমর্চিতা । (??)

মহিষাসুরশিরশ্ছেদনর্তকী মুণ্ডখমিডনী ॥ ১৩০॥

মাতা মরকটশ্যামা মাতঙ্গী মতিসাক্ষিণী । (??)

মাধবী মাধবারাধ্যা মধুমাংসপ্রিযা মহী ॥ ১৩১॥

মারী মারান্তক ক্ষোভকারিণী মীনলোচনা ।

মালতীকুন্দমালাঢ্যা মাষৌদনসমুৎসুকা ॥ ১৩২॥

মিথুনাসক্তহৃদযা মোহিতাশেষবিষ্টপা ।

মুদ্রা মুদ্রাপ্রিযা মূর্খনাশিনী মেষভক্ষিণী ॥ ১৩৩॥

মূকাম্বা মুখজা মোদজনকালোকনপ্রিযা ।

মৌনব্যাখ্যাপরা মৌনসত্যচিন্মাত্রলক্ষণা ॥ ১৩৪॥

মৌঞ্জীকচ্ছধরা মৌর্বীদ্বিরেফমুখরোন্মুখা।

ওং ঐং হ্রীং শ্রীং যং - ৪২॥

যজ্ঞবৃন্দপ্রিয়া যষ্ট্রী যান্তবর্ণস্বরূপিণী ॥ ১৩৫॥

যন্ত্ররূপা যশোদাত্মজাতসদ্ভূতবৈভবা।

যশস্করী যমারাধ্যা যজমানাকৃতির্যতিঃ ॥ ১৩৬॥

যাকিনী যক্ষরক্ষাদিবৃতা যজনতর্পণা।

যাথার্থ্যবিগ্রহা যোগ্যা যোগিনী যোগনায়িকা ॥ ১৩৭॥

যামিনী যজমোৎসাহা যামিনীচরভক্ষিণী।

যাযজূকর্চিতপদা যজ্ঞেশী যক্ষিণীশ্বরী ॥ ১৩৮॥

যাসাপদ্মধরা যাসাপদ্মান্তরপরিষ্কৃতা।

যোষাঽভয়ঙ্করী যোষিদ্বৃন্দবন্দিতপাদুকা ॥ ১৩৯॥

ওঁ ঐং হ্রীং শ্রীং রং - ৪৩॥

রক্তচামুণ্ডিকা রাত্রিদেবতা রাগলোলুপা।

রক্তবীজপ্রশমনী রজোগন্ধনিবারিণী ॥ ১৪০॥

রণরগনটীরভ্রমজ্জীরচরণাম্বুজা ।
রজধ্ববস্তাচলা রাগহীনমানসহংসিনী ॥ ১৪১॥

রসনালেপিতক্রূররক্তবীজকলেবরা ।
রক্ষাকরী রমা রম্যা রঞ্জিনী রসিকাবৃতা ॥ ১৪২॥

রাকিণ্যম্বা রামনুতা রমাবাণীনিষেবিতা ।
রাগালাপপরব্রহ্ম শিরো মালাপ্রসাধনা ॥ ১৪৩॥

রাজরাজেশ্বরী রাজ্ঞী রাজীবনযনপ্রিযা ।
রাজব্রাতকিরীটাংশুনীরাজিতপদাম্বুজা ॥ ১৪৪॥

রুদ্রচামুণ্ডিকা রুক্মসদৃশা রুধিরপ্রিযা ।
রুদ্রতাণ্ডবসামর্থ্যদর্শনোৎসুকমানসা ॥ ১৪৫॥

রুদ্রাট্টহাসসঙ্ক্ষুভ্যজ্জগন্তুষ্টিবিধাযিনী ।
রুদ্রাণী রুদ্রবনিতা রুরুরাজহিতৈষিণী ॥ ১৪৬॥

রেণুকা রেণুকাসূনুস্তুত্যা রেবাবিহারিণী ।
রোগঘ্নী রোষনির্দগ্ধশত্রুসেনানিবেশিনী ॥ ১৪৭॥

রোহিণীশাংশুসম্ভূতঝরীরত্নবিতানকা ।

রৌদ্রী রৌদ্রাস্ত্রনির্দগ্ধরাক্ষসা রাহুপূজিতা ॥ ১৪৮॥

ওং ঐং হ্রীং শ্রীং লং - ৪৪॥

লঘূক্তিবল্লুস্তিমিতবাণীত্যক্তবিপঞ্চিকা ।

লজ্জাবতী ললৎপ্রোচ্চকেশা লম্বিপযোধরা ॥ ১৪৯॥

লযাদিকর্ত্রী লোমালিলতানাভীসরঃ কটী ।

ললদোষ্ঠদলদ্বন্দ্ববদনা লক্ষ্যদূরগা ॥ ১৫০॥

ললন্তিকামণীভাস্বন্নিটিলশ্রীমুখাম্বুজা ।

ললাটার্ধনিশানাথকলঙ্কোদ্ভাসিলোচনা ॥ ১৫১॥

ললিতা লোভিনী লোভহীনা লোকেশ্বরী লঘুঃ ।

লক্ষ্মীর্লক্ষ্মীশসহজা লক্ষ্মণাগ্রজবন্দিতা ॥ ১৫২॥

লাকিনী লঘিতাপৃভোধিনিবহা ললিতাগ্নিকা ।

লাজহোমপ্রিযা লম্বমুক্তাভাসুরনাসিকা ॥ ১৫৩॥

লাভালাভাদিরহিতা লাস্যদর্শনকোবিদা ।

লাবণ্যদর্শনোদ্বিগ্নরতীশা লধুভাষিণী ॥ ১৫৪॥

লাক্ষারসাঞ্চিতপদা লধুশ্যামা লতাতনুঃ ।

লাক্ষালক্ষ্মীতিরস্কারিযুগলাধরপল্লবা ॥ ১৫৫॥

লীলাগতিপরাভূতহংসা লীলাবিনোদিনী ।

লীলানন্দনকল্পদ্রুমলতাডোলাবিহারিণী ॥ ১৫৬॥

লীলাপীতাব্ধিবিনুতা লীলাস্বীকৃতবিযহা ।

লীলাশুকোক্তিমুদিতা লীলামৃগবিহারিণী ॥ ১৫৭॥

লোকমাতা লোকসৃষ্টিস্থিতিসংহারকারিণী ।

লোকাতীতপদা লোকবন্দ্যা লোকৈকসাক্ষিণী ॥ ১৫৮॥

লোকাতীতাকৃতির্লব্ধা মার্গত্যাগপরান্তকী । (??)

লোকানুল্লঞ্ঘিতনিজশাসনা লব্ধবিযহা ॥ ১৫৯॥

লোমাবলি লতা লম্বিস্তনযুগ্মনতাননা ।

লোলচিত্তবিদূরস্থা লোমলম্ব্যগুজালকা ॥ ১৬০॥

লবিতারিশিরোহস্তা লোকরক্ষাপরাযণা ।

ॐ ঐং হ্রীং শ্রীং বং - ৪৫॥

বনদুর্গা বিন্ধ্যদলবাসিনী বামকেশ্বরী ॥ ১৬১॥

***Stotram Digitalized By Sanskritdocuments.org***

বশিন্যাদিস্তুতা বহ্নিজ্বালোদ্গারিমুখী বরা ।
বক্ষোজযযুগ্মবিরহাসহিষ্ণুকরশঙ্করা ॥ ১৬২॥

বাঙ্মনোতীতবিষযা বামাচারসমুৎসুকা ।
বাজপেযাধ্বরানন্দা বাসুদেবেষ্টদাযিনী ॥ ১৬৩॥

বাদিত্রধ্বনিসম্ভ্রান্তদিগ্গজালির্বিধীডিতা ।
বামদেববসিষ্ঠাদিপূজিতা বারিদপ্রভা ॥ ১৬৪॥

বামস্তনাশ্লিষ্টধ্বস্তপদ্মশম্ভুবিহারিণী ।
বারাহী বাস্তুমধ্যস্থা বাসবান্তঃ পুরেষ্টদা ॥ ১৬৫॥

বারাঙ্গনানীতপূর্ণকুম্ভদীপালিমণ্টপা ।
বারিজাসনশীর্ষালিমালা বার্ধিসরোবরা ॥ ১৬৬॥

বারিতাসুরদর্পশ্রীঃ বার্ধঘ্নীমন্ত্ররূপিণী ।
বার্তালী বারুণী বিদ্যা বরুণারোগ্যদাযিনী ॥ ১৬৭॥

বিজযা বিজযাস্তুত্যা বিরূপা বিশ্বরূপিণী ।
বিপ্রশত্রুকদম্বঘ্নী বিপ্রপূজ্যা বিষাপহা ॥ ১৬৮॥

বিরিঞ্চিশিক্ষণোদ্যুক্তমধুকৈটভনাশিনী ।

বিশ্বমাতা বিশালাক্ষী বিরাগা বীশবাহনা ॥ ১৬৯॥

বীতরাগবৃতা ব্যাঘ্রপাদ নৃত্তপ্রদর্শিনী ।

বীরভদ্রহতোন্মত্তদক্ষযজ্ঞাশ্রিতামরা ॥ ১৭০॥

বেদবেদ্যা বেদরূপা বেদাননসরোরুহা ।

বেদান্তবিষযা বেণুনাদজ্ঞা বেদপূজিতা ॥ ১৭১॥

বৌষড্মন্ত্রমযাকারা ব্যোমকেশী বিভাবরী । ??

বন্দ্যা বাগ্বাদিনী বন্যমাংসাহারা বনেশ্বরী ॥ ১৭২॥

বাঞ্ছাকল্পলতা বাণী বাক্প্রদা বাগধীশ্বরী ।

ওং ঐং হ্রীং শ্রীং শং - ৪৬॥

শক্তিবৃন্দাবৃতা শব্দমযী শ্রীচক্ররূপিণী ॥ ১৭৩॥

শবরী শবরীদুর্গা শরভেশচ্ছদাকৃতিঃ ।

শব্দজালোদ্ভবঢ্ঢক্কারবাসন্দিগ্ধতাপসা ॥ ১৭৪॥

শরণাগতসন্ত্রাণপরাযণপটীযসী ।

শশাঙ্কশেখরা শস্ত্রধরা শতমুখাম্বুজা ॥ ১৭৫॥

শাতোদরী শান্তিমতী শরচ্চন্দ্রনিভাননা ।

শাপাপনোদনচণা শঙ্কাদোষাদিনাশিনী ॥ ১৭৬॥

শিবকামসুন্দরী শ্রীদা শিববামাঙ্গবাসিনী ।

শিবা শ্রীদাননিপুণলোচনা শ্রীপতিপ্রিয়া ॥ ১৭৭॥

শুকাদিদ্বিজবৃন্দোক্তিস্তব্ধমানসগীষ্পতিঃ ।

শুক্রমণ্ডলসঙ্কাশমুক্তামালা শুচিস্মিতা ॥ ১৭৮॥

শুক্লদংষ্ট্রাগ্রসন্দীপ্তপাতালভ্রান্তপন্নগা ।

শুভ্রাসনা শূরসেনাবৃতা শূলাদিনাশিনী ॥ ১৭৯॥

শূকবৃশ্চিকনাগাখুর্বৃকহিংস্রালিসংবৃতা ।

শূলিনী শূলভগাহিশঙ্খচক্রগদাধরা ॥ ১৮০॥

শোকাব্ধিশোষণোদ্যুক্তবডবা শ্রোত্রিয়াবৃতা ।

শঙ্করালিঙ্গনানন্দমেদুরা শীতলাম্বিকা ॥ ১৮১॥

শঙ্করী শঙ্করার্ধাঙ্গহরা শাঙ্কুরবাহনা ।

শম্ভুকোপাগ্নিনির্দগ্ধমদনোৎপাদকেক্ষণা ॥ ১৮২॥

শাম্ভবী শম্ভুহস্তাব্জলীলারুণকরাবলিঃ ।

শ্রীবিদ্যা শুভদা শুভবস্ত্রা শুম্ভাসুরান্তকী ॥ ১৮৩॥

ওং ঐং হ্রীং শ্রীং ষং - ৪৭॥

ষডাধারাব্জনিলযা ষাড্গুণ্যশ্রীপ্রদাযিনী ।

ষড়ূর্মিঘ্নি ষডধ্বান্তপদারূঢস্বরূপিণী ॥ ১৮৪॥

ষটেকাণমধ্যনিলযা ষডর্ণা ষান্তরূপিণী ।

ষড্জাদিস্বরনির্মাত্রী ষডঙ্গযুবতীশ্বরী ॥ ১৮৫॥

ষড্ভাবরহিতা ষণ্ডকণ্টকী ষণ্মুখপ্রিযা ।

ষড্সাস্বাদমুদিতা ষষ্ঠীশাদিমদেবতা ॥ ১৮৬॥

ষোঢান্যাসমযাকারা ষোডশাক্ষরদেবতা ।

ওং ঐং হ্রীং শ্রীং সং - ৪৮॥

সকলা সচ্চিদানন্দলক্ষণা সৌখ্যদাযিনী ॥ ১৮৭॥

সনকাদিমুনিধ্যেযা সন্ধ্যানাট্যবিশারদা ।

সমস্তলোকজননী সভানটনরঞ্জিনী ॥ ১৮৮॥

সরঃ পুলিনলীলার্থিযুবতীনিবহোৎসুকা ।

সরস্বতী সুরারাধ্যা সুরাপানপ্রিযাসুরা ॥ ১৮৯॥

সরোজলবিহারোদ্যৎপ্রযাকৃষ্টোত্তরাংশুকা ।

সাধ্যা সাধ্যাদিরীহতা স্বতন্ত্রা স্বস্তিরূপিণী ॥ ১৯০॥

সাধ্বী সঙ্গীতরসিকা সর্বদা সর্বমঙ্গলা ।

সামোদ্গীতনিজানন্দমহিমালিস্সনাতনা ॥ ১৯১॥

সারস্বতপ্রদা সামা সংসারার্ণবতারিণীম্ ।

সাবিত্রী সঙ্গনির্মুক্তা সতীশী সর্বতোমুখী ॥ ১৯২॥

সাখ্যতত্ত্বজ্ঞনিবহব্যাপিসালা সুখেশ্বরী ।

সিদ্ধসঙ্ঘাবৃতা সান্ধ্যবন্দিতা সাধুসৎকৃতা ॥ ১৯৩॥

সিংহাসনগতা সর্বশৃঙ্গাররসবারিধিঃ ।

সুধাব্ধিমধ্যনিলযা স্বর্ণদ্বীপান্তরস্থিতা ॥ ১৯৪॥

সুধাসিক্তালবালোদ্যৎকাযমানলতাগৃহা ।

সুভগা সুন্দরী সুভ্রূঃ সমুপাস্যত্বলক্ষণা ॥ ১৯৫॥

সুরদ্রুসঙ্কুলাভোগতটা সৌদামিনীনিভা ।

সুরভীকেশসম্ভ্রান্তদ্বিরেফমুখরান্বিতা ॥ ১৯৬॥

সূর্যচন্দ্রাংশুধিক্কারিপ্রভারত্নালিমণ্ডপা ।
সোমপানোদ্ভবামোদবিপ্রগীতাপদানকা ॥ ১৯৭॥

সোমযাগপ্রিয়া সোমসূর্যবহ্নিবিলোচনা ।
সৌগন্ধিকমরুদ্বেগমোদিতা সদ্বিলাসিনী ॥ ১৯৮॥

সৌন্দর্যমোহিতাধীনবল্লভা সন্ততিপ্রদা ।
সৌভাগ্যমন্ত্রিণী সত্যবাদা সাগরমেখলা ॥ ১৯৯॥

স্বশ্বাসোচ্ছ্বাসভুবনমোচনোন্মোচনা স্বধা ।
ওঁ ঐং হ্রীং শ্রীং হং - ৪৯॥

হয়ারূঢা হয়গ্রীববিনুতা হতকিল্বিষা ॥ ২০০॥

হরালিঙ্গনশীতাংশূন্মিষন্নেত্রমুদ্বতী ।
হরিনাভিসমুদ্ভূতবিরিঞ্চিবিনুতা হরা ॥ ২০১॥

হাদিবিদ্যা হানিহীনা হাকিনী হরিচণ্ডিকা ।
হারাবলিপ্রভাদীপ্ত হরিদন্তদিগম্বরা ॥ ২০২॥

হালাহলবিষোদ্বিগ্নবিষ্টাপানেকরক্ষকী ।
হাহাকাররবোদ্গীতদনুজা হারমঞ্জুলা ॥ ২০৩॥

হিমাদ্রিতনযা হীরমকুটা হারপন্নগা ।

হুতাশনধরা হোমপ্রিযা হোত্রী হযেশ্বরী ॥ ২০৪॥

হেমপদ্মধরা হেমবর্মরাজসমর্চিতা ।

হংসিনী হংসমন্ত্রার্থা হংসবাহা হরাঙ্গভৃত্ ॥ ২০৫॥

হৃদ্যা হৃদ্যমনোনিত্যবাসা হরকুটুম্বিনী । (??)

হ্রীমতিঃ হৃদযাকাশতরণিঃ হ্রিম্পরাযণা ॥ ২০৬॥

ওঁ ঐং হ্রীং শ্রীং ক্ষং - ৫০॥

ক্ষণদাচরসংহারচতুরা ক্ষুদ্রদুর্মুখা ।

ক্ষণদার্চ্যা ক্ষপানাথসুধার্দ্রকবরী ক্ষিতিঃ ॥ ২০৭॥

ক্ষমা ক্ষমাধরসুতা ক্ষামক্ষোভবিনাশিনী ।

ক্ষিপ্রসিদ্ধিপ্রদা ক্ষিপ্রগমনা ক্ষুন্নিবারিণী ॥ ২০৮॥

ক্ষীণপুণ্যাসুহৃত্ ক্ষীরবর্ণা ক্ষযবিবর্জিতা ।

ক্ষীরান্নাহারমুদিতা ক্ষ্মর্ক্ষ্ম্যন্ত্রাপ্তেষ্টযোগিরাট্ ॥ ২০৯॥

ক্ষীরাব্ধিতনযা ক্ষীরঘৃতমধ্বাসবার্চিতা ।

ক্ষুধার্তিদীনসন্ত্রাণা ক্ষিতিসংরক্ষণক্ষমা ॥ ২১০॥

ক্ষেমঙ্করী ক্ষেত্রপালবন্দিতা ক্ষেত্ররূপিণী ।

ক্ষৌমাম্বরধরা ক্ষত্রসম্প্রার্থিতজযোৎসবা ॥ ২১১॥

ক্ষ্বেলভুগ্রসনাস্বাদ জাত বাগ্রসবৈভবা ।

ইতি শ্রীভৃঙ্গিরিটিসংহিতাযাং শক্ত্যুৎকর্ষপ্রকরণে

শিবগৌরীসংবাদে শ্রীশিবকামসুন্দরীসহস্রনামস্তোত্রং সম্পূর্ণম্

॥ উত্তরপীতিকা ॥

ইত্যেতত্তে মযাঽঽখ্যাতং নাম সাহস্রমুত্তমম্ ।

শিবকামসুন্দরীদেব্যাঃ শিবাযাঃ পরমেশ্বরি ॥ ১॥

চতুর্বেদস্য তাৎপর্যসারভূতং সুখপ্রদম্ ।

সহস্রনামক স্তোত্ররত্নাভিধমিদং প্রিযে ।

শ্রুত্যন্তবাক্যনিচযবদ্ধং শীঘ্রপ্রসিদ্ধিদম্ ॥ ২॥

আযুরারোগ্যদং পুণ্যবর্ধনং ভুক্তিমুক্তিদম্ ।

বিঘ্নবারণবিঘ্নেশং সংসারধ্বান্তভাস্করম্ ॥ ৩॥

শোককান্তারদাবাগ্নিমজ্ঞানাব্ধিঘটোদ্ভবম্ ।

রোগপর্বতদভ্ভোলিং শত্রুবর্গাহিতার্ক্ষ্যকম্ ॥ ৪॥

সর্ববিদ্যাপ্রদং নৃণাং তুষ্টিদং পুষ্টিদং প্রিযে ।

ভূতাঃ প্রেতাঃ পিশাচাশ্চ ব্রহ্মরক্ষোগণোরগাঃ ॥ ৫॥

জটামুনিগণাঃ ক্ষুদ্রজ্বরকৃদ্গ্রহমণ্ডলাঃ ।

কোটরারেবতীজ্যেষ্ঠাপূতনামাতৃকাদযঃ ॥ ৬॥

মহাজ্বরকরাশ্চান্যে ভেতালাগ্নিধরাশ্শিবে ।

অপস্মারাদিমাশ্চান্যে দৃষ্টা হিংসারারাশ্শিবে ॥ ৭॥

রাক্ষসা মনুজা যজ্ঞবিঘ্নভূতাশ্চ পন্নগাঃ ।

সালুবাঃ শরভাঃ সিংহাঃ ব্যাঘ্রা ঋক্ষা গজা বৃষাঃ ।

শাক্করা মহিষাচ্ছগাঃ গবযাবৃকজম্বুকাঃ ।

অন্যে বন্যা মৃগা দেবি হিংসকাশ্শূকবৃশ্চিকাঃ ॥ ৯॥

অণ্ডজাস্স্বেদজা দেবি চোদ্ভিদাশ্চ জরাযুজাঃ ।

যে যে হিংসাকরাস্সর্বে নামসাহস্রজাপিনম্ ॥ ১০॥

দৃষ্ট্বা ভীত্যা পরিভ্রান্তাঃ স্খলন্তশ্চ বিদূরতঃ ।

পতন্তশ্চ পলাযন্তে প্রাণত্রাণপরাযণাঃ ॥ ১১॥

অম্বিকানামসাহস্রজপশীলস্য যোগিনঃ ।

দ্রব্যাণি যোঽপহরতে তং ভক্ষযতি যোগিনী ॥ ১২॥

শিবকামসুন্দরীভক্তিশালিনং দ্বেষ্টি যো নরঃ ।

তং নাশযতি সা দেবী সপুত্রগণবান্ধবম্ ॥ ১৩॥

শিবকামসুন্দরীভক্তে চাভিচারাদিদুষ্কৃতিম্ ।

যঃ প্রেরযতি মূঢাত্মা তং দেবী শিবসুন্দরী ॥ ১৪॥

মুখাগ্নিজ্বালযা দেবী দাহযত্যঞ্জসা ধ্রুবম্ ।

অনেন সদৃশং স্তোত্রং নাস্তি নাস্ত্যদ্রিকন্যকে ॥ ১৫॥

এতৎস্তোত্রজপেনৈব বিষ্ণুর্লক্ষ্মীশ্বরোঽভবত্ ।

জগদ্রক্ষককর্তৃত্বং ব্রহ্মণো বেধসঃ প্রিযে ॥ ১৬॥

সৃষ্টিকর্তৃত্বমপ্যস্বে বেদানাং চ বিধাযকঃ ।

অভূদন্যেঽমরাশ্চৈব বহ্নীন্দ্রযমরাক্ষসাঃ ॥ ১৭॥

জলবায্বীশধনদাঃ যোগিনশ্চ মহর্ষযঃ ।

জপাদস্য স্বযং সিদ্ধিং লেভিরে সততং শিবে ॥ ১৮॥

মম শক্তিমযী ত্বং হি দেবী সা কামসুন্দরী ।

তস্যাঃ প্রভাবং নান্যেন বক্তুং শক্যং হি সুন্দরি! ॥ ১৯॥

ত্বযৈব চিন্তনীযং তত্ ত্বত্তো নান্যাস্তি হি প্রিযা ।

এতন্নামসহস্রস্য জপে ত্রৈবর্ণিকঃ প্রিযে ॥ ২০॥

মযাধিক্রিযতেঽন্যেষাং চ ভবেদধিকারতা ।

অন্যে তু পাঠযেদ্বিপ্রৈঃ লভেরন্দবেষ্টকামনাম্ ॥ ২১॥

যো বিপ্রশ্শান্তহৃদযঃ নামসাহস্রমুত্তমম্ ।
জপতি শ্রদ্ধযা যুক্তঃ সর্বান্কামানবাপ্নুযাত্ ॥ ২২॥

শুক্রবারে সৌমবারে ভৌমবারে গুরোর্দিনে ।
দর্শে পর্বণি পঞ্চম্যাং নবম্যাং কুলসুন্দরি ॥ ২৩॥

কৃষ্ণাঙ্গারচতুর্দশ্যাং সঙ্ক্রান্তাবযনে বিষৌ ।
বৃষে শুক্লনবম্যাং চ শ্রাবণ্যাং মূলভে শুভে ॥ ২৪॥

আষাঢে চ তুলাযাং চ নক্ষত্রে পূর্বফল্গুনে ।
জ্যেষ্ঠে চ ফাল্গুনে মাসি উত্তরে ফল্গুনে শুভে ॥ ২৫॥

নক্ষত্রে চ শুভাং দেবীং গৌরীনামভিরম্বিকাম্ ।
অর্চযেৎসততং প্রীতা সুন্দরী ভবতি প্রিযে ॥ ২৬॥

প্রতিপন্মুখরাকান্তদিনরাত্রিষু চাম্বিকাম্ ।
অর্চযেৎকুসুমৈর্বিল্বৈঃ হারিদ্রৈঃ কুকুমৈঃ শুভৈঃ ॥ ২৭॥

হরিদ্রাচূর্ণসম্পৃক্তৈরক্ষতৈর্তুলসীদলৈঃ ।
কেসরৈঃ কেতকৈশ্চৈব মন্দারৈশ্চম্পকৈরপি ॥ ২৮॥

প্রথমং গন্ধতৈলেনাভিষিচ্য ততঃ পরম্ ।

পযসা মধুনা দয়া ঘৃতেন লিকুচেন চ ॥ ২৯॥

নারিকেলাম্রপনসকদলীনাং ফলত্রযম্ ।

শর্করামধুসম্পৃক্তং পঞ্চ্জামৃতমথাম্বিকাম্ ॥ ৩০॥

অভিষিচ্য ততঃ পশ্চাৎসগন্ধীশ্চন্দনৈঃ শুভৈঃ ।

অন্নৈশ্চ কুঙ্কুমৈশ্চৈব ফলানাং চ রসৈস্তথা ॥ ৩১॥

গঙ্গাম্বুভিস্ততঃ কুর্যাত্বাসিতৈঃ সলিলৈশ্শুভৈঃ ।

সম্যগুন্মার্জ্য বস্ত্রৈশ্চ পীতাম্বরমুখৈঃ শিবৈঃ ॥ ৩২॥

আচ্ছাদ্য কঞ্চুকৈশ্চৈবালঙ্কৃত্যাভরণৈস্সুমৈঃ ।

শুদ্ধান্নৈঃ পাযসান্নৈশ্চ রসখণ্ডান্নৈশ্চ ভক্ষ্যকৈঃ ॥ ৩৩॥

গুডান্নৈঃ পাযসাপূপৈর্মাষাপূপৈশ্চ লেহ্যকৈঃ ।

খাদ্যৈশ্চ বিবিধৈরন্নৈঃ চিত্রান্নৈশ্চ বিশেষতঃ ॥ ৩৪॥

লড্ডুকৈর্মোদকৈশ্চাপি করম্ভৈশ্চ শরাবকৈঃ ।

ফলৈশ্চ বিবিধৈশ্চাপি কুর্যান্নৈবেদ্যমাদরাত্ ॥ ৩৫॥

ষোডশৈরুপচারৈশ্চ পূজযেচ্ছিবসুন্দরীম্ ।

সুবাসিনীঃ কন্যকাশ্চ বস্ত্রান্নৈশ্চ প্রপূজযেত্ ॥ ৩৬॥

এভির্নামভিরেবৈতাং মূর্তে যন্ত্রে ঘটেঽপি বা ।
আবাহ্যাভ্যর্চ্যযেদ্দেবীং জপেদ্বা সন্নিধৌ স্তুতিম্ ॥ ৩৭॥

যং যং কামযতে শীঘ্রং তং তং প্রাপ্নোত্যসংশযঃ ।
বিদ্যার্থী লভতে বিদ্যাং পুত্রার্থী পুত্রমাপ্নুযাত্ ॥ ৩৮॥

কন্যার্থী লভতে কন্যাং অপ্সরস্সদৃশীং শিবে ।
ধনার্থী লভতে শীঘ্রং ধনং ভূরি মহেশ্বরি ॥ ৩৯॥

শ্রীবিদ্যোপাস্তিশীলানামাত্মরক্ষার্থমাদরাত্ ।
শত্রুনির্ঘাতনার্থঞ্চ স্বদাসানুগ্রহায চ ॥ ৪০॥

জপ্তব্যং সততং ভদ্রে শ্রুতিবদ্বাগ্যতশ্শুচিঃ ।
সর্বমন্ত্রাধিকারত্বাত্ শ্রীবিদ্যোপাসকস্য তু ॥ ৪১॥

গুরুং স্বযং জপ্যং বিনা সুন্দর্যেবাস্য দেশিকা ।
তেষামেব বিধিঃ প্রোক্তো নান্যেষাং মেনকাত্মজে ॥ ৪২॥

উপদেশাদেব চ গুরোঃ জপ্তব্যং শিবভাষিতম্ ।
শ্রীচক্রপুরসমাজস্ত্রিপুরাতুষ্টিকারণম্ ॥ ৪৩॥

তত্ত্বমস্যাদিবাক্যার্থপরব্রহ্মপদপ্রদম্ ।

শিবজ্ঞানপ্রদং দেবি শীঘ্রসিদ্ধিকরং পরম্ ॥ ৪৪॥

শ্রৌতস্মার্তাদিকর্মাদৌ ভক্ত্যেদং যো জপেৎপ্রিয়ে ।

অবিঘ্নেন চ তৎকর্ম সাফল্যং চৈতি নিশ্চযঃ ॥ ৪৫॥

যুদ্ধে প্রযাণে দুর্দ্ধর্ষে স্বপ্নে বাতে জলে ভযে ।

জপ্তব্যং সততং ভদ্রে তত্তচ্ছান্ত্যৈ মহেশ্বরি ॥ ৪৬॥

তত্তন্মাতৃকযা পুস্তং ত্রিতারেণ সমন্বিতম্ ।

স্তোত্রমেতজ্জপেদ্দেবীমর্চযেচ্চ বিশেষতঃ ॥ ৪৭॥

সদা তস্য হৃদম্ভোজে সুন্দরী বসতি ধ্রুবম্ ।

অণিমাদিমহাসিদ্ধীঃ লভতে নাত্র সংশযঃ ॥ ৪৮॥

অশ্বমেধাদিভির্যজ্ঞৈঃ যৎফলং তত্ সুদুর্লভম্ ।

অণিমাদিমমহাসিদ্ধীঃ লভতে নাত্র সংশযঃ ॥ ৪৯॥

এভির্নামভিরেবং যঃ কালীং দুর্গাঞ্চ চণ্ডিকাম্ ।

অর্চযেৎসততং ভক্ত্যা যে সর্বান্কামাংল্লভেন্নরঃ ॥ ৫০॥

সুন্দরীমূর্তিভেদাশ্চ কালী দুর্গা চ চণ্ডিকা ॥ ৫১॥

ঐকৈব শক্তিঃ পরমেশ্বরস্য

ভিন্না চতুর্ধা বিনিযোগকালে।

ভোগে ভবানী পুরুষেষু বিষ্ণুঃ

কোপেষু কালী সমরেষু দুর্গা ॥ ৫২॥

একা শক্তিশ্চ শম্ভোর্বিনিময়নবিধৌ সা চতুর্ধা বিভিন্না

ক্রোধে কালী বিজাতাচ সমরসময়ে সা চ চণ্ডী চ দুর্গা।

ভোগে সৃষ্টৌ নিযোগে চ সকলজগতাং সা ভবানী চ জাতা

সর্বেষাং রক্ষণানুগ্রহকরণবিধৌ তস্য বিষ্ণুর্ভবেৎসা ॥ ৫২॥

সম্প্রযচ্ছতি তস্যেষ্টমচিরাদেব সুন্দরী।

স্তোত্ররত্নমিদং ভদ্রে সদা নিষ্কামনাযুতঃ ॥ ৫৩॥

যো জপেন্নামকং ধাম ব্রহ্মবিষ্ণ্বাদিদুর্লভম্।

সত্যজ্ঞানমনন্তাখ্যং ব্রাহ্মং কৈবল্যসঞ্জ্ঞকম্ ॥ ৫৪॥

ভবাব্ধিতারকং সোঽপি প্রাপ্নোতি মদনুগ্রহাত্।

চিৎসভাযাং নৃত্যমাননটরাজস্য সাক্ষিণী ॥ ৫৫॥

তস্যৈব মহিষী নাম্না শিবকামা চ সুন্দরী।

সা পরব্রহ্মমহিষী সদানন্দা শুভপ্রদা ॥ ৫৬॥

শিবকামসুন্দরীনাম্নাং সহস্রং প্রোক্তমম্বিকে ।

এতস্য সদৃশং স্তোত্রং নাস্তি নাস্তি জগত্রয়ে ॥ ৫৭॥

সত্যং সত্যং পুনস্সত্যং ত্বাং শপেঽহং বদামি তে ।

নাস্তিকায় কৃতঘ্নায় বিপ্রদ্বেষপরায চ ॥ ৫৮॥

ন দেযং বেদবিপ্রর্ষিভক্তিযুক্তায শাম্ভবি ।

দেযং ত্রিপুরবিদ্যেশীত্যথর্বশ্রুতি চোদিতম্ ॥ ৫৯॥

বিস্তৃতেন কিমন্যচ্ছ শ্রোতুকামাসি সুন্দরি ।

ইতি নিগদিতবন্তং রাজতে পর্বতেঽস্মিন্

নবমণিগণপীঠে সংস্থিতং দেবমীশম্ ।

মুহুরপি কৃতনম্রা ভক্তিনম্রা ভবানী

করযুগসরসিজেনালিলিঙ্গাতিগাঢম্ ॥ ৬০॥

ইতি শ্রীভৃঙ্গিরিটিসংহিতাযাং শক্ত্যুৎকর্ষপ্রকরণে শিবগৌরীসংবাদে

শ্রীশিবকামসুন্দরীসহস্রনামস্তোত্রোত্তরপীঠিকা সম্পূর্ণা ॥

॥ শিবমস্তু ॥

Proofread by DPD

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Shivakama Sundari Sahasranama Stotram Lyrics in Bengali PDF
% File name : shivakAmasundarIsahasranAmastotra.itx
% Category : sahasranAma
% Location : doc_devii
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Proofread by : DPD
% Description-comments : Mahaperiaval trust publication
% Latest update : August 23, 2015
% Send corrections to : sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ December 15, 2015 ] at Stotram Website